PVG's

# Muktangan English School & Jr. College, Pune - 9

## Terminal Examination (2024-25)
## Standard - IX

**Subject - SANSKRIT (ENTIRE)** | **Marks - 80**
**Date - 17-10-2024** | **Time - 8.00 a.m. to 11.00 a.m.**

## प्रथमः विभागः - सुगमसंस्कृतम् (५)

**प्र.१ (अ) चित्रं दृष्ट्वा नामानि लिखत। (५ तः ४)** **(२)**

१) 

२) 

३) 

४) 

५) 

**प्र.१ (आ) सङ्ख्या अक्षरैः अङ्कैः वा लिखत। (३ तः २)** **(१)**

१) ४४ २) नवदश ३) १८

**प्र.१ (इ) अक्षरैः समयलेखनं कुरुत। (५ तः ४)** **(२)**

१) ३.१५ २) ६.५५ ३) ८.०० ४) ९.१५ ५) १०.०५

## द्वितीयः विभागः - गद्यम् (२१)

**प्र.२ (अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

खेलराजः नाम कश्चित् नृपः। विश्पला तस्य पत्नी। सा यथा महाविदुषी आसीत्, तथैव रणकुशला अपि आसीत्। खेलराजः अपि शूरः पराक्रमी च आसीत्। सः विश्पलया सह सुखेन जीवति स्म।

अथ कदाचित् शत्रवः खेलराजस्य राज्ये आक्रमणं कृतवन्तः। महत् युद्धम् आरब्धम्। सेनायाः नायकः खेलराजः रणरङ्गं प्रविष्टवान्। विश्पला अपि रणरङ्गं प्रविष्टवती। भुवम् अवतीर्णा चामुण्डेश्वरी इव सा शत्रूणां संहारं कृतवती। तस्याः शौर्यं पराक्रमं च दृष्ट्वा शत्रवः अपि चकिताः अभवन्।

**(क) एकवाक्येन (३ तः २)** **(२)**

१) विश्पला कस्य पत्नी?
२) खेलराज कीदृशः आसीत्?
३) विश्पला केषां संहारं कृतवती?

**(ख) सत्यम् असत्यं वा इति वाक्यं पुनर्लिखित्वा लिखत।** **(१)**

खेलराजः नाम कश्चित् सेवकः।

**(ग) उचितं पर्यायं चित्वा वाक्य पुनर्लिखत ।** **(१)**

अ) विश्पला अपि .......... प्रविष्टवती । (रणरङ्गं / क्रीडाङ्गणं)

आ) विश्पलायाः शौर्यं दृष्ट्वा शत्रवः .......... अभवन् । (प्रसन्नाः /चकिताः)

**(घ) सूचनानुसारं कृतीः कुरुत । (४ तः ३)** **(३)**

१) गद्यांशतः विशेषणानि चिनुत ।

अ) ........, ........ खेलराजः ।

ब) ........, ........ विश्पला।

२) वर्णविग्रहं कुरुत । रणकुशला = .......... ।

३) लकारं लिखत । सा रणकुशला अपि <u>आसीत्</u> ।

४) गद्यांशात् पूर्वकालवाचक - त्वान्त / ल्यबन्त अव्ययं चिनुत ।

**प्र. २ (आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

देवदत्तः नाम कोऽपि धनिकः आसीत् । एकदा तस्य धनस्यूतः लुप्तः । तस्य गृहे षड् भृत्याः आसन् । तेषु एव एकः चौरः स्यात्, ति तस्य मतम् । चौरं ग्रहीतु सः वीरबलं साहाय्यम् अयाचत । वीरबलः अवदत्, ''मित्र! अद्य सायङ्काले तव सर्वान् भृत्यान् मम गृहं प्रेषय'' इति ।

यथानिश्चितं सर्वे सेवकाः वीरबलस्य गृहम् आगताः । वीरबलेन पूर्वमेव सर्वेषां कृते समानोन्नतयः यष्टिकाः आनीताः । सः सेवकान् अवदत्, ''भोः पश्यन्तु, एताः मायायष्टिकाः'' तासु एकां यष्टिकां स्वीकृत्य सर्वैः देवदत्तस्य गृहं गन्तव्यं, ÷वः प्रभाते पुनरागन्तव्यम् । येन केनापि धनस्यूतः चोरितः स्यात् तस्य यष्टिका अङ्गुलिमात्रं दीर्घा भविष्यति ।

**(क) एकवाक्येन उत्तरत। (३ तः २)** **(२)**

१) कस्य धनस्यूतः लुप्तः ?

२) वीरबलः कस्य मित्रम् ?

३) कस्य यष्टिका दीर्घा भविष्यति ?

**(ख) वाक्यं पुनर्लिखित्वा कः कं वदति इति लिखत ।** **(१)**

''मित्र ! अद्य सायङ्काले तव सर्वान् भृत्यान् मम गृहं प्रेषय। ''

**(ग) सन्धिविग्रहं कुरुत । -** पुनरागन्तव्यम् = .......... + .......... **(१)**

**(घ) सूचनानुसारं कृतीः कुरुत। (४ तः ३)** **(३)**

१) प्रश्ननिर्माणं कुरुत । - सः <u>सेवकान्</u> अवदत् ।

२) लकारं लिखत । - तेषु एव एकः चौरः स्यात् ।

३) गद्यांशतः विशेषणानि चित्वा लिखत ।

१) .......... धनस्यूतः ।

२) .......... यष्टिकाः ।

४) गद्यांशात् द्वे षष्ठ्यन्तपदे चिनुत ।

**प्र. २ (इ) गद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** **(५)**

सः कोलकतानगरे डाकतारविभागस्य निर्देशकरूपेण कार्यरतः आसीत् । तस्य कार्यकाले एकस्मिन् दिने कोऽपि दुःखितः केरल - प्रदेशीयः सैनिकः महोदयं मेलितुम् आगतः । सः तस्य पित्रोः स्वास्थ्यविषये किञ्चिदपि ज्ञातुम् असमर्थः । यतः तदा पत्रस्य प्रवासकालः केरलतः अरुणाचलप्रदेशपर्यन्तं क्वचित् मासाधिकोऽपि आसीत्। तेन पं वेलणकरमहोदयस्य चिन्तनम् आरब्धम्, 'कथं पत्रस्य प्राप्तिकालं न्यूनं कर्तुं शक्नोमि ?'

प्र. २ (ई) **माध्यमभाषया उत्तरं लिखत । (प्रस्तावना अपेक्षिता) (२ तः १)** **(२)**

१) माता तनयायाः विचारपरिवर्तनं कथं करोति ?

२) रघुना कौत्सस्य इच्छा कथं पूरिता ?

## तृतीयः विभागः - पद्यम् (१६)

प्र. ३ (अ) **पद्यांशौ पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१) प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
किन्तु मे पशुभिस्तुल्यं किन्नु सत्पुरुषैरिति ।।

२) बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् ।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ।।

३) अकृत्वा परसन्तापम् अगत्वा खलमन्दिरम् ।
अनुत्सृज्य सतां वर्त्म यत्स्वल्पमपि तद् बहु ।।

**(क) एकवाक्येन उत्तरत । (३ तः २)** **(२)**

१) प्रत्यहं किं प्रत्यवेक्षेत ?

२) नृप कथं पराक्रमेत् ?

३) मनुजेन किम् अनुसर्तव्यम्?

**(ख) सूचनानुसारं कृतीः कुरुत। (३ तः २)** **(२)**

१) सन्धिं कुरुत ।
अ) किम् + नु = .......... ।
आ) नरः + चरितम् = .......... ।

२) समानार्थकशब्दानां युग्मं चिनुत।

| अ | आ |
|---|---|
| १) सज्जनाः<br>२) पशुः | मनुजः<br>सत्पुरुषाः<br>मृगः |

३) तालिकां पूरयत ।

| धातुः | त्वान्त/ल्यबन्त रुपम् |
|---|---|
| गम् - गच्छ<br>उत् + सृज् | .............<br>............. |

प्र. ३ (आ) **पद्यांश पठित्वा जालरेखाचित्रं पूरयत ।** **(२)**

१) दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेत् जलम्।
सत्यपूतां वदेत् वाणीं मनःपूतं समाचरेत् ।।

[ ] ⟵ आचरणम्

दृष्टिपूतः ⟶ [ ]

सत्यपूता ⟶ [ ]

[ ] ⟵ जलम्

**प्र. ३ (इ) पद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत । (२ तः १)** **(२)**

१) गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सताम् ।
केतकीगन्धमाघ्राय स्वयमायान्ति षट्पदाः ।।

२) सुखार्थी चेत् त्यजेव्दिद्यां विद्यार्थी चेत् त्यजेत्सुखम् ।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ।।

**प्र. ३ (ई) रिक्तस्थानानि पूरयित्वा अन्वयं पुनर्लिखत ।** **(२)**

अलब्धं धनं ........। लब्धं (धनं) प्रयत्ननः ........। रक्षितं (धनं) सम्यक ........ । वृध्दं (धनं) तीर्थेषु ........।।

**प्र. ३ (उ) श्लोकौ पूर्णौ शुध्दौ च लिखत। (३ तः २)** **(४)**

१) यस्य षष्ठी .......... ।।
२) अक्रोधेन .......... ।।
३) भुक्त्वा .......... ।।

**(ऊ) माध्यमभाषया उत्तरं लिखत । प्रस्तावना अपेक्षिता (केवलम् १)** **(२)**

१) योगासनैः के लाभाः भवन्ति ?
२) पद्मासनस्य वर्णनं कथं कृतम् ?

## चतुर्थः विभागः - लेखनकौशलम् । (१६)

**प्र. ४ (अ) निबन्धं पूरयत ।** **(५)**

सूर्यः जगतः मित्रम् अत सः मित्रः अपि कथ्यते । सूर्यः - पूर्वस्यां दिशि ऊदेति । तदा कस्तां दिशि गगनं रक्तवर्णं दृश्यते । सूर्योदये सति सूर्यपूजकाः दिनकरं प्रणमन्ति । केचित् .......... प्रतिष्ठन्ते । पक्षिणः .......... बहिः आगच्छन्ति सुस्वरेण गायन्ति कूजन्ति च । सर्वे मानवाः तेषां निर्यकार्याणां प्रारम्भं कुर्वन्ति । केचित् .......... मग्नाः केचित् स्नानपूजनादिके कार्ये निरताः भवन्ति । सूर्यः उर्जायाः स्त्रोतः । सः जगते .......... उष्णतां च यच्छति । अहो मनोहरः प्रवृत्तिप्रेरकः सूर्योदयः ।

(मञ्जूषा = प्रकाशं, वृत्तपठने, प्रभाते, कार्यालये, नीडेभ्यः)

**प्र. ४ (आ) अव्ययानां / धातूनाम् उपयोगं कृत्वा वाक्यानि लिखत । (५ तः ३)** **(३)**

१) रुच् - रोचते  २) क्रुध्  ३) सह  ४) अभितः  ५) गम् - गच्छ्

**प्र. ४ (इ) सङ्ख्यारुपाणि लिखित्वा वाक्यानि पूरयत । (केवलम् ४)** **(२)**

१) पाठ्यपुस्तके .......... गद्यपाठाः सन्ति । (७)
२) साहित्ये .......... रसाः सन्ति । (९)
३) बिल्वदले .......... पत्राणि सन्ति । (३)
४) देवदतस्य गृहे ........ भृत्याः आसन् । (६)
५) रावणस्य .......... मस्तकेभ्यः किरीटाः पतिताः । (१०)

**प्र. ४ (ई) माध्यमभाषातः संस्कृतभाषया अनुवादं कुरुत । (६ तः ४)** **(४)**

1) You stand up.
2) Elephant eat bananas.
3) A cat drinks milk.
4) O child, see that moon.
5) We should eat fruits.
6) Students ask questions.

**अथवा**

**प्र. ४ (ई) मञ्जूषातः शब्दान् प्रयुज्य चित्रवर्णनं कुरुत । (४ वाक्यानि)**

(मञ्जूषा - उपहारः, रक्षाबन्धनस्य, बध्दुं, रङ्गवल्ली, आनन्देन, आसनम्, भ्रातुः, पीठे)



.......... चित्रमिदम् । भ्राता आसने उपविष्टः । तस्य समीपे .......... वर्तते । भगिनी रक्षासूत्रे हस्ते गृहीत्वा तिष्ठति । सा तत् सूत्रं .......... हस्ते .......... सिध्दा । माता .......... पश्यति । .......... दीपस्थालिका स्थापिता । पृष्ठतः भित्तिकाचित्रं सुखासन्दम् अपि दृश्येते । .......... परितः .......... आलिखिता अस्ति ।

**प्र. ४ (उ) अमरकोषात् समानार्थकशब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २)** **(२)**

१) <u>नृपः</u> सेवकम् आदिशत् ।

२) देवः <u>मनुष्यान्</u> रक्षति ।

३) सः अतीव शूरः <u>सैनिकः</u> अस्ति ।

४) सः क्रीडाङ्गणे <u>निपुणः</u> ।

## पञ्चमः विभागः - व्याकरणम् (१४)

**प्र. ५ (अ) तालिकां पूरयत ।**

**(क) नाम- तालिकां पूरयत । (६ तः ४)** **(२)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| भानुना | .......... | भानुभिः | तृतीया |
| भानोः | .......... | .......... | पञ्चमी |
| मातुः | .......... | .......... | षष्ठी |
| .......... | पित्रोः | .......... | सप्तमी |

**(ख) सर्वनाम- तालिका पूरयत । (६ तः ४)** **(२)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| अस्मै | .......... | .......... | पञ्चमी |
| .......... | आभ्याम् | .......... | सप्तमी |
| इदम् | .......... | .......... | प्रथमा |

**(ग) धातु-तालिकां पूरयत । (६ तः ४)** **(२)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| ......... | ......... | मन्यन्ताम् | प्रथम |
| रमै | ......... | .......... | उत्तम |
| नृत्य | ......... | ......... | मध्यम |

**प्र. ५ (आ) सूचनानुसारं कृतीः कुरुत । (५ तः ३)** **(३)**

१) एतानि छायाचित्राणि <u>पश्य।</u> (लकारपरिचयं कुरुत।)

२) रात्रौ शीघ्रं निद्रां कृत्वा प्रातःकाले शीघ्रम् उत्तिष्ठामि । (त्वान्त अव्ययं निष्कासयत।)

३) वाल्मीकिना रामायणं रच्यते। (प्रयोगपरिचयं कुरुत।)

४) त्वं पाकं करोषि । ('भवती उपयोजयत।)

५) बालकाः ग्रन्थं पठन्ति । (एकवचने लिखत।)

**प्र. ५ (इ) पृथक्कुरुत । (८ तः ६)** **(३)**

| इतरेतर द्वन्द्वः | समाहार द्वन्द्वः |
|---|---|
| | |

(मञ्जूषा - पशुपक्षिणः, सीतारामौ, मुखनासिका, हस्तपादम्, तिलगुडम्, सुखदुःखे, पत्रपुष्पाणि, शिवपार्वत्यौ)

**प्र. ५ (ई) वाक्यं शुध्दं कुरुत । (३ तः २)** **(२)**

१) सा शूरः बालिका अस्ति ।

२) अहं पाठशालां गच्छति ।

३) ऋषयः अरण्यात् वसन्ति ।

## षष्ठः विभागः - अपठितम् (८)

**प्र. ६ (अ) गद्यांशं पठित्वा कृतीः कुरुत । (६ तः ४)** **(४)**

सा मकरम् अवदत्, ''अहं तस्य कपेः हृदयम् इच्छामि।'' ततः मकरः नद्याः तटम् अगच्छत्। कपिः तस्मै फलानि अयच्छत्। तदनन्तरं कपिः मकरस्य पृष्ठे उपविशत् । यथापूर्वं तौ विहारार्थम् अगच्छताम् । कपिनासह सः नद्या जले अतरत् । नद्याः मध्ये सः कपिम् अवदत्, ''मम पत्नी तव हृदयम् इच्छति ।'' चतुरः कपिः शीघ्रम् अभाषत्, ''मम हृदयं तु अहं वृक्षे एव अमुश्चम्। तदानेतुं मां पुनरपि नदीतटं नय।'' मूर्खः मकरः तथा आचरत्। तदा कपिः सत्वरं वृक्षस्य शाखाम् आरोहत् अभाषत च, ''मूर्ख अपि हृदयं शरीरात् पृथक् वर्तते। अद्य आवयोः मैत्री समाप्तिम् अगच्छत्।''

**(क) पूर्णवाक्येन उत्तरत ।**

हृदयं कस्मात् पृथक् न विद्यते ?

**(ख) समानार्थकशब्दान् लिखत ।**

१) मर्कटः - ........ २) तरुः - ........

**(ग) वाक्यं पुनर्लिखित्वा सत्यम् असत्यं वा लिखत ।**

कपिः चातुर्येण स्वसंरक्षणं करोति ।

**(घ) माध्यमभाषया सरलार्थं लिखत ।**

मम हृदयं तु अहं वृक्षे एव अमुश्चम् ।

**(च) कारकपरिचयं कुरुत ।**

कपिः तस्मै फलानि अयच्छत् ।

**प्र. ६ (आ) पद्यांशं पठित्वा कृतीः कुरुत ।**

सरस्वतीयं विद्यानां देवता ज्ञानदायिनी ।
अस्या वरदहस्तेन ज्ञानवान् खलु मानवः ।।

**(१) पूर्णवाक्येन उत्तरं लिखत । (२ तः १)** **(१)**

१) ज्ञानदायिनी देवता का ?

२) कः ज्ञानवान् भवति ?

**(२) पद्यांशात् विरुद्धार्थकं शब्दं चिनुत । (केवलम् १)** **(१)**

१) राक्षसः X ........ २) अज्ञानम् X ........

**प्र. ६ (इ) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत ।** **(२)**

सद्वर्तनं च विद्वत्ता च तथाऽध्यापनकौशलम् ।
शिष्यप्रियत्वमेतध्दि गुरोर्गुणचतुष्टयम् ।।




❖❖❖❖❖